# Program Specific Outcomes

## शास्त्री - न्यायः

## विशेषफलितांशः – (Specific Outcomes)

- परमाणुकारणता अस्मिन्नेव तन्त्रे सुविशदं प्रतिपाद्यते इत्यतः एतच्छास्त्राध्ययनम् आधुनिकविज्ञानिनां (Modern Scientist) अणुविज्ञान (Atom Science) शास्त्राध्ययने योग्यतां प्रयच्छति।
- जगतः सृष्टिप्रक्रिया विनाशप्रक्रिया च अधिगन्तुं शक्येते।
- स्वार्थानुमानमधीत्य स्वयं नैकनवसन्दर्भेषु वस्तुयाथार्थ्यम् अनुमातुं प्रभवति।
- परार्थानुमानमधिगम्य परविप्रतिपत्तिनिरसने प्रावीण्यं जायते।
- संस्कृतसम्भाषणे शास्त्रविषयाणां प्रतिपादने च पाटवं संप्राप्यते।

## शास्त्री प्रतिष्ठा न्यायः

- व्याप्तिसिद्धान्तलक्षणपक्षतादिपूर्ववादानामबाधितरूपाध्ययनेन बुद्धेः ग्रहणशक्तेः प्रवृद्ध्या अध्येता स्वच्छेया यत्किञ्चिदपि शास्त्रं पाश्चात्यदर्शनं वा अध्येतुं प्रवीणः जायते।
- दुरुद्धरसुतर्कसन्तत्युपबृंहितेश्वरानुमानरहस्यसमाकलनेन नास्तिकध्वान्ताक्षेपणां समूलं विध्वंसने वैशारद्यं सुष्टु अवाप्तुं शक्यते। इत्थं नास्तिकपरम्परां समुच्छेद्य जगति अनाद्यास्तिकशिष्टपरम्परायाः परिरक्षणं पुनः प्रतिष्ठापनञ्च प्रकर्षेण भवितुमर्हति।
- परमपुरुषार्थस्य स्वरूपं तत्प्रापकोपायाश्च अधिगम्यन्ते।
- मङ्गलवादस्थगभीरराद्धान्ताभ्यासेन स्नातकः सकलकार्योपक्रमे देवस्तुत्यादिरूपमङ्गलं शिष्टसम्मतं स्वयं अनुष्ठाय अन्यान् तत्कर्मणे प्रेरयतीति आस्तिकसम्प्रदाय समुद्धरणेन पुण्यविशेषप्राप्तिर्भवति।

## आचार्यः - न्यायः

- वादिप्रतिवादिभ्यां निर्वर्त्यमाणवादप्रक्रिया शास्त्रेऽमुष्मिन्नेव सुसंबोध्यते इति तदध्येता वादप्रक्रियायां नितान्तं प्रगल्भः जायते।
- हेत्वभासनिग्रस्थानादीनामध्यनेन प्राप्तसदसद्धेतुविवेकधीः अन्यैस्सह वादसन्दर्भे निर्दुष्टहेतूपस्थापने प्रावीण्यं प्राप्नोति।
- शक्तिवादव्युत्पत्तिवादाद्युत्तरवादानां अध्ययनेन पदानां सामथ्यरूपशक्तिं निर्धार्य प्रकृतिप्रत्ययर्थान् सुनुश्चित्य च अध्येता नव्यन्यायाविष्कृतशाब्दबोधाख्यविलक्षणप्रमितिं स्वयं प्राप्य अन्येभ्यः समुत्पादने दक्षः भवति।
- सूक्ष्मातिसूक्ष्मविचारधारायाः विराट् रूपस्य क्रोडपत्रस्य एतच्छास्त्रमात्रप्रसिद्धस्याध्ययनेन बुद्धेः सर्वाण्यपि मलानि अपाक्रियन्ते, निरतिशयशक्तिरपि आधीयते।
- दुरूहयुक्तीनामभ्यासेन साम्प्रदायिकशास्त्रार्थसभासु आधुनिकविचारगोष्ठीषु (Seminar)च असाधारणवाक्पाटवपूर्वं विचारप्रस्तावे समार्थ्यं संप्राप्यते।
- नवशिक्षानीत्यनुसारं (N.E.P) सङ्कल्पितप्रगल्भशिक्षकाणां प्राप्तिः भवति।

## विद्यावारिधिः

- अप्रकाशितपाण्डुलिपिरूपेणस्थितग्रन्थानां प्रकाशने बीजप्रसारणात् शास्त्रकर्तॄणामापारानुग्रहेण पुण्यविशेषः प्राप्यते।
- क्रोडपत्रसदृशविलक्षणविचारधारायां सामर्थ्यं वर्धते।
- शास्त्रग्रन्थानां विवरणलेखने, नूतनग्रन्थरचनायां, विशिष्टानुसन्धानप्रबन्धनिर्माणे च विलक्षणं दाक्षिण्यं सञ्जायते।
- भारतीयज्ञानपरम्परा , (Indian Knowledge System) M.O.O.CS. इत्यादौ पाठनिर्माणे क्षमता प्राप्यते।
- असाधारणबोधनशक्तेः प्राप्त्या दुरूहविषायाणां सरलतया अन्यान् प्रति बोधने दक्षता जायते।
- अनुसन्धानछात्रेभ्यः मार्गनिर्देशे योग्यता प्राप्यते।